# Dasharupa-Gitika (Song for Ten Forms of God)

# दशरूप-गीतिका

## Document Information

Text title : Dasharupa Gitika (Song for Ten Forms of God)

File name : dasharUpagItikA.itx

Category : misc, sanskritgeet, vishhnu, dashAvatAra, hkmeher

Location : doc_z_misc_general

Author : Harekrishna Meher meher.hk at gmail.com

Transliterated by : Harekrishna Meher

Proofread by : Harekrishna Meher

Description/comments : Mtigtikjalih

Acknowledge-Permission: Dr. Harekrishna Meher

Latest update : November 11, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 11, 2023

*sanskritdocuments.org*

# दशरूप-गीतिका

ॐ जय जय दशरूप हरे !
नमोऽस्तु ते दशरूप हरे !
धर्म-संस्थापनार्थं भुवि ते
चकास्ति चक्रं स्वस्ति करे,
निरस्त-समस्त-शुभेतरे ।
जय जय जय दशरूप हरे !
नमोऽस्तु ते दशरूप हरे ! ॥ (ध्रुवम्) ॥

राक्षस-शङ्ख-विनाशी भगवान्,
रक्षसि धातु-र्वेदान् सर्वान् ।
मीन-शरीरो रमसे श्रीमान्,
प्रलये वलयित-जलधि-भरे ।
महति निरवधौ सुदुस्तरे ।
जय जय जय दशरूप हरे !
नमोऽस्तु ते दशरूप हरे ! ॥ १ ॥

अम्बुनिधौ सुर-दानव-निहितम्,
मन्दरमद्रिं वहसि सुविहितम् ।
कूर्मराज ! तव कर्म जन-हितम्,
काये कलिते सलिलचरे ।
प्रसन्न-किन्नर-नाग-नरे ।
जय जय जय दशरूप हरे !
नमोऽस्तु ते दशरूप हरे ! ॥ २ ॥

सुरक्षिता स्यात् सर्जन-सरणी,
अगाध-नीरधि-मग्ना धरणी ।
शरणं भवतो लभते वरणी,

सुकरं शूकर-रद-शिखरे ।
समर्चिते धृत-चराचरे ।
जय जय जय दशरूप हरे !
नमोऽस्तु ते दशरूप हरे ! ॥ ३॥

प्रह्लाद-मनोह्लादनकारी,
हिरण्यकशिपो-र्हृदय-विदारी ।
भक्त-कृते त्वं दुष्ट-निवारी,
विहरन् नरहरि-कलेवरे ।
मन्द-निदारुण-खर-नखरे ।
जय जय जय दशरूप हरे !
नमोऽस्तु ते दशरूप हरे ! ॥ ४॥

त्वमवसि वामन ! देव-समाजम्,
त्रिपद-मेदिनी-दान-व्याजम् ।
पातयसि बलिं दानवराजम्,
विरसं रसातले विवरे ।
त्रिविक्रमे त्वयि पुरस्सरे ।
जय जय जय दशरूप हरे !
नमोऽस्तु ते दशरूप हरे ! ॥ ५॥

भ्रमन् भुवमेकविंशति-वारम्,
कुरुषे क्षत्रिय-गण-संहारम् ।
वारयसि सर्व-वर्वर-भारम्,
स्वभुजे भ्राजति परशु-परे ।
भैरव-सन्निभ-वीरवरे ।
जय जय जय दशरूप हरे !
नमोऽस्तु ते दशरूप हरे ! ॥ ६॥

सीता-वल्लभ ! रघुकुल-भूषण !
जित-खर-दूषण ! विभी-विभीषण !
तव सुगौरवं रावण-भीषण !
समङ्कितं लङ्का-समरे ।
पापराशिहर-चाप-शरे ।

जय जय जय दशरूप हरे !
नमोऽस्तु ते दशरूप हरे ! ॥ ७॥

नीलाम्बर हे ! प्रलम्ब-दलनम्,
यशः प्रशस्यं यमुना-यमनम् ।
दूरं दुरितं याति विगलनम्,
मङ्गल-लाङ्गल-मुषलधरे ।
सङ्गत-मध्वरि-मधुस्वरे ।
जय जय जय दशरूप हरे !
नमोऽस्तु ते दशरूप हरे ! ॥ ८॥

शान्तिं कलयति तव कल्याणी,
हिंसा-पशुवध-विरोध-वाणी ।
सुगत ! सद्गतिं भजते प्राणी,
करुणा-ममता-प्रेम-झरे ।
भवद्-भाव-रस-विभास्वरे ।
जय जय जय दशरूप हरे !
नमोऽस्तु ते दशरूप हरे ! ॥ ९॥

कल्कि-कलेवर ! कर-करवालम्,
वहन् पुण्यमय-वह्नि-विशालम् ।
दहसि दुस्सहं दुष्कृत-जालम्,
दुर्जन-गर्जन-महाज्वरे ।
कलुषित-कलि-काले प्रखरे ।
जय जय जय दशरूप हरे !
नमोऽस्तु ते दशरूप हरे ! ॥ १०॥

तनोतु भद्रं चिरन्तनी ते,
शुभानुकम्पा परम-पुनीते ।
हरेकृष्ण-मेहेर-सुगीते,
माधव ! तव भजनावसरे ।
मतिरास्तां त्वयि रमेश्वरे ।
जय जय जय दशरूप हरे !
नमोऽस्तु ते दशरूप हरे ! ॥ ११॥

– गीत-रचना : डॉ हरेकृष्ण-मेहेरः
("मातृगीतिकाञ्जलिः"- काव्यात्)

Copyright Dr.Harekrishna Meher

*Dasharupa-Gitika (Song for Ten Forms of God)*
pdf was typeset on November 11, 2023

Please send corrections to *sanskrit@cheerful.com*